International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(4): 149-151
© 2022 IJSR
www.anantaajournal.com
Received: 11-04-2022
Accepted: 02-06-2022

भोलेश्वरप्रधान
शोधछात्रः, संस्कृतविभाग, राजा श्रीरामचन्द्र-भञ्जदेव विश्वविद्यालय, द्वितीयपरिसरः, केन्दुझरम्, ओडिशा, भारत

Corresponding Author:
भोलेश्वरप्रधान
शोधछात्रः, संस्कृतविभाग, राजा श्रीरामचन्द्र-भञ्जदेव विश्वविद्यालय, द्वितीयपरिसरः, केन्दुझरम्, ओडिशा, भारत

# अद्वैत्यवेदान्तप्रवर्त्तकस्य जगद्गुरुशङ्कराचार्यस्य जीवनदर्शनम्

**भोलेश्वरप्रधानः**

## प्रस्तावना

### शङ्कराचार्यस्य जीवनवृत्तम् –

भारतीयदर्शनशास्त्रे जगद्गुरुशङ्कराचार्यस्य स्थानं स्वतन्त्रम्। वेदान्तदर्शनस्य जनकः भवति श्रीशङ्कराचार्यः। तस्य कालनिर्द्धारणे मतवैविध्यता दृश्यते। केचन समालोचकाः सः ईसा पूर्वस्य इति कथयन्ति। अन्ये केचन नवमशताब्द्यामिति मन्यन्ते। डॉ. सूर्यनारायणस्य "विजयनगर का इतिहास" इति पुस्तके सः जगद्गुरुशङ्कराचार्यः प्रथमशताब्द्याः इति वर्णितमस्ति। पुनश्च पालडायसन्महोदयस्य मतं सर्वे समालोचकाः दार्शनिकाः इतिहासकाराः च समर्थयन्ति। तस्य मतानुसारं शङ्कराचार्यस्यः समयः आसीत् 788 ई तः 820 ई. यावत्।

अस्मिन् काले सः केरलराज्यस्य मालावारतटे कालडीनामकस्थाने जन्मग्रहणमकोरत्। तस्य पितुर्नाम आसीत् शिवगुरुः। सः यजुर्वेदीब्राह्मणः आसीत्। शङ्कराचार्यस्य पितामहस्य नाम विद्याधिराजपण्डितः। तस्य माता आर्यम्बा। आद्यौ तु शङ्कराचार्यस्य पितरौ निरपत्यौ आस्ताम्। परवर्त्तिनि काले तौ शिवभक्तौ भूत्वा प्रतिदिनं सभक्तिं शिवमाराधयतः। एकदा शिवगुरोः स्वप्ने आगत्य भगवान् शिवः तं वरं प्रददाति स्म। शिवगुरुः ज्ञानिनं पुत्रं प्रार्थयते। कालक्रमेण शिवगुरोः पत्नी आर्यम्बा गर्भिणी जाता। भगवतः शङ्करस्य वरप्रसादात् उत्पन्नकारणात् तस्य पितरौ शङ्करः इति नाम्ना चक्रतुः। अस्य महोदयस्य प्राथमिकी शिक्षा गृहे अभवत्। वर्षद्वयावस्थायामेव सः अक्षरज्ञानं प्राप्य, तृतीयवर्षे काव्यपुराणादीनाम् अध्ययनं च कृतवान्। पितुः मरणात् प्राक् तस्य माता पञ्चवर्षे वयसि यज्ञोपवीतसंस्कारं सम्पादितवती। तदनन्तरं सः गुरुकुलं गत्वा स्वल्पकालमध्ये सर्वाः विद्याः अधितवान्। वाल्यावस्थायां तस्य मनसि वैराग्यभावनायाः आगमनकारणात् सः सन्यासीधर्मपालनार्थं मातरं प्रति अपृच्छत्। परन्तु माता अनुमतिं न दत्तवती। यस्मात् कारणात् शिवः मायया मकररूपं धारयन् नद्यां स्नानकाले तं स्वमुखेन गृहीतवान्। तत्रैव सः मातरं प्रति उक्तवान् - "यदि संन्यासिधर्मपालनाय भवती वदिष्यति तर्हि एषः मम त्यागं करिष्यतीति"। तदा मातुः आदेशं संप्राप्य मकरः तं त्यक्तवान्। तदनन्तरं शङ्करः गोविन्दपादेन संन्यासशिक्षां गृहीतवान्।

पुनश्च षोडशवर्षे सः शास्त्रार्थेषु दिग्विजयं प्राप्तुं काश्याः प्रयागं प्रति समागतवान्। तत्र कुमारिलभट्टेन सह साक्षात्कारं कृत्वा तस्य शिष्यत्वम् अङ्गिगकृत्य तत्र अतिष्ठत्।

प्रयागात् शङ्कराचार्यः मिथिलां प्रति समागत्य मण्डनमिश्रेण सह शास्त्रार्थं कृत्वा तं पराजितवान्। पत्युः पराजय कारणात् विमुखा सति मण्डनमिश्रस्य पत्नी अर्धाङ्गिनीत्वेन शास्त्रार्थं कृतवती। परन्तु कामकलादिप्रश्नोत्तरे शङ्कराचार्येण निरूत्तरं जातम्। पुनश्च उत्तरं प्रदानपूर्वकं शास्त्रार्थे तामपि विजित्य मण्डनमिश्रं स्वस्य शिष्यत्वेन स्वीकृतम्। तदनन्तरं तस्य दिग्विजययात्रारम्भः अभवत्। अद्वैतवेदान्तं शङ्कराचार्यं च अधिकृत्य ऐ. सि. शर्मणोः अभिप्रायश्च उद्धर्तव्यः। तद्यथा – The six orthodox systems of Indian philosophy beginning with the analatical & pluralistic theories of Nyaya vaisesika, passing through the dualism of samkhya yoga & the activistic pluralism of the purva mimamsa culminate in the non – dualistic theory of the Advatic vedanta of sankaracharya which presents the highest logical, speculative, intellectual & critical acumen ever exhibited by a philosopher in the world. [1]

**शङ्कराचार्यस्य जीवनदर्शनम्**

जगद्गुरुशङ्कराचार्यस्य दर्शनं भवति वेदान्तदर्शनम्। वेदान्तदर्शने सः आत्मस्वरूपं प्रतिपादितवान्। यस्मात् कारणात् शास्त्रमिदं सर्वेषां शास्त्राणां शिरमणिभूतं भवति। शास्त्रेऽस्मिन् "ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इति विचारः मुख्यः। अर्थात् - "यद् रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति तत् सत्यम्" इति। अन्यद् असत्यं मिथ्या वा। एवं च परिवर्त्तनशीलत्वात् जगद् असत्यं, ब्रह्म च सत्यमाशाश्वतिकम् अपरिवर्तनशीलत्वात् तद् ब्रह्म द्विप्रकारकम्। यथा – निर्गुणं सगुणं च। निर्गुणं ब्रह्म सच्चिदानन्दस्वरूपम्। यथा कठोपनिषदि दृश्यते –

"एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च।"[2]
"एकं रूपं बहुधा यः करोति।" [3]

ब्रह्मणः अविद्या उपाध्यवच्छिन्नं कारणशरीरं समष्टिरूपेण 'ईश्वरः' व्यष्टिरूपेण च 'प्राज्ञः' जीवः वा। ज्ञानेन सर्वं विज्ञायते इति शङ्करः। अस्मिन् प्रसङ्गे श्रुतिषु अनेकाः सुक्त्यः सन्ति। यथा –

"ईशावास्यमिदं सर्वम्" [4]
"एतदात्म्यमिदं सर्वम्" [5]
"यस्मिन् विज्ञाते सर्वं विज्ञातं भवति" [6]
"सं आत्मा तत्त्वमस्ति श्वेतकेतो"[7]
"मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति"[8]
"तत्र को मोहः कः शोक एकत्वमनुपश्यतः" [9]

परमात्मा भवति अद्वितीयः, सर्वव्यापकः, अन्तर्यामी, साक्षी, चैतन्यस्वरूपः, निर्गुणः चेति। स एव ऊर्णनाभ इव मायया सकलं जगत् सृजति संहरति च। श्वेताश्वेतरोपनिषदि वर्णितमस्ति यत् –

न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।। [10]
यस्तन्तुर्णनाभ इव तन्तुभिः प्रधानजैः स्वभावतः।
देव एकः स्वमावृणोत् स नो दधात् ब्राह्मप्ययम्।। [11]
एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च।। [12]

वेदान्तदर्शने वेदाऽभिमतः त्रैतवादोऽपि प्रस्तूयते। तत्र एकः ईश्वरः साक्षीरूपः अभोक्ता च, द्वितीयः जीवः कर्मफलभोक्ता, तृतीया अचेतना प्रकृतिः। उक्तं च –

द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते
तयोरन्यः पिप्पलं स्वाद्वत्त्य-
नश्नन्नन्यो अभिचाकशीति।। [13]

अस्माकं राष्ट्रस्य संरचनायां शङ्कराचार्यस्य महद्योगदानम् अस्ति। शङ्कराचार्य्येण प्रदत्ता प्रस्थानत्रयी सदैव ध्रुवतारा इव भारतवर्षस्य नभोमण्डले प्रज्वलति। सः भारतीय इति अस्माकं कृते गर्वस्य विषयः भवति।
अनेन प्रकारेण श्रीशङ्कराचार्यस्य जीवनदर्शनमधिकृत्य शोधपत्रमिदं सम्पादितम्। अन्ते च भगवत्याः तारिणीदेव्याः तथा जगत्पालकस्य जगन्नाथस्य पादपयोजयुगले सभक्तिकं प्रणम्य विररामि। इति शम्।।

**ग्रन्थपञ्जी**


1. Sharma C. Ethical Philosophies India, Ch. Xi. 240.
2. कठ. 2.5.10
3. कठ. 2.5.12
4. ईशा. 1
5. छा. उपनिषद्.
6. छा. उपनिषद्.

7. छा. उपनिषद्.
8. कठ. 2.1.10
9. ईशा. 7
10. श्वेता. 3.6-8
11. श्वेता. 3.6-10
12. श्वेता. 3.6-11
13. श्वेता. 3.4-6